Click here to go back

।। श्री महागणपतये नमः ।।
Indian Astrology Source
www.astrovidya.com

**अथ चंद्र मंत्रः>**

**ओं अस्य श्री सोम महामंत्रस्य गौतम ऋषिः। गायत्री छंदः। सोमो देवता। सां बीजं। सीं शक्तिः। सूं कीलकं। मम सोमग्रह प्रसाद सिद्ध्यर्थे जपे विनियोगः॥ (करन्यासः) सोमाय अंगुष्ठाभ्यां नमः। निशाकराय तर्जनीभ्यां नमः। क्षीरोदार्णव संभवाय मध्यमाभ्यां नमः। लक्ष्मीसहोदराय अनामिकाभ्यां नमः। नारकेशाय कनिष्ठिकाभ्यां नमः। सुधामूर्तये करतलकरपृष्ठाभ्यां नमः॥ (अंगन्यासः) सोमाय हृदयाय नमः। निशाकराय शिरसे स्वाहा। क्षीरोदार्णव संभवाय शिखायै वषट्। लक्ष्मीसहोदराय कवचाय हुं। नारकेशाय नेत्रत्रयाय वौषट्। सुधामूर्तये अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्भंधः॥ (ध्यानं) गदाधरं देवं श्वेतवर्णं निशाकरं। ध्यायेदमृत संभूतं सर्वकाम फलप्रदं॥(लमित्यादि पंच पूजा) ओं लं पृथ्वितत्वात्मने गंधान्धारयामि। ओं हं आकाशतत्वात्मने पुष्पं समर्पयामि। ओं यं वायुतत्वात्मने धूपमाघ्रापयामि। ओं रं वह्नितत्वात्मने दीपन्दर्शयामि। ओं वं अमृततत्वात्मने अमृतनैवेद्यं समर्पयामि। सर्वतत्वात्मने सर्वोपचार पूजां समर्पयामि॥ अप्यायस्वसमेतुते विश्वतः सोम वृष्णियं भवावाजस्य संगथे। इति चंद्र मंत्रः॥**

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com

Click here to go back